लघुन्यासविधिः

१२१२

2

रु० श्रीगणेशायनमः ॐ अथात्मानंशिवात्मानंश्रीरुद्ररूपंध्यायेत् अथातो
१ रुद्रस्नानार्चनाभिषेकविधिंव्याख्यास्यामः आदिदेवतीर्थेस्नात्वोदीत्यशुचिप्र
यतोब्रह्मचारीशुक्लवासातस्य दक्षिणाप्रत्यङ्देशेतन्मुखंवास्थित्वा आत्मनिदेव
1 तांस्थापयेत् ॐ प्रजननेब्रह्मातिष्ठतु पादयोर्विष्णुस्तिष्ठतु हस्तयोर्हरस्तिष्ठतु
बाह्वोरिंद्रस्तिष्ठतु जठरेऽग्निस्तिष्ठतु हृदयेशिवस्तिष्ठतु कंठेवसवस्तिष्ठंतु॥
वक्त्रेसरस्वतीतिष्ठतु नासिकयोर्वायुस्तिष्ठतु नयनयोःसूर्याचंद्रमसौतिष्ठेतां॥
कर्णयोरश्विनौदेवौतिष्ठेतां ललाटेरुद्रास्तिष्ठंतु मूर्ध्न्यादित्यास्तिष्ठंतु शिरसिमहा
देवस्तिष्ठतु शिखायांचामुंडातिष्ठतु पृष्ठेपिनाकीतिष्ठतु पुरतःशूलीतिष्ठतु पार्श्व
योःशिवाशंकरौतिष्ठेतां सर्वतोवायुस्तिष्ठतु ततोबहिःसर्वतोऽग्निज्वालामालापरिवृ
तास्तिष्ठंतु मांरक्षंतु यजमानंरक्षंतु अग्निर्मेवाचिश्रितः वाङ्हृदये हृदयंमयि १
अहममृते अमृतंब्रह्मणि वायुर्मेप्राणेश्रितः प्राणोहृदये हृदयं॰ सूर्योमेचक्षुषि

श्रितः चक्षुर्हृदये हृदयं० चंद्रमामेमनसिश्रितः मनोहृदये हृदयं० दिशोमेश्रोत्रे
2 श्रिताः श्रोत्रंहृदये हृदयं० आपोमेरेतसिश्रिताः रेतंहृदये हृदयं० पृथिवीमेश
रीरेश्रिताः शरीरंहृदये हृदयं० ओषधिवनस्पतयोमेलोमसुश्रिताः लोमानि
हृदये हृदयं० इंद्रोमेबलेश्रितः बलंहृदये हृदयं० पर्जन्योमेमूर्ध्निश्रिताः मूर्धा
हृदये हृदयं० ईशानोमेमन्योश्रितः मन्युर्हृदये हृदयं० आत्मामआत्मनिश्रितः
आत्माहृदये हृदयंमयि अहममृते अमृतंब्रह्मणि पुनर्मेआत्मापुनरायुरागात्
पुनःप्राणःपुनराकूतमागात् वैश्वानरोरश्मिभिर्वावृधानः अंतस्तिष्ठत्वमृत।
स्यगोपाः यथालिंगमंगानिसमुज्य इतिकुघुन्यासससंपूर्णम्॥ ६ ॥ ६ ॥
ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्य
वर्चसेंद्रस्येंद्रियेणाभिषिंचामिबलायश्रियेयशसेन्नाद्यायःभूर्भुवःस्वःअमृता 2
भिषेकोस्तु शांतिःपुष्टिःतुष्टिःशांतु॥ ६ ॥ ५ ॥ ७ ॥ ८ ॥